# j nAnaprasUnAmbAstotram

# જ્ઞાનપ્રસૂનામ્બાસ્તોત્રમ્

## Document Information

Text title : jnAnaprasUnAmbAstotram

File name : jnAnaprasUnAmbAstotram.itx

Category : devii, pArvatI, devI

Location : doc_devii

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Devi book stall, Kodumgallur, Kerala

Source : Sthothra Rathnaakaram, edited by N. Bappuravu, 2010

Latest update : August 6, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 14, 2020

*sanskritdocuments.org*

# જ્ઞાનપ્રસૂનામ્બાસ્તોત્રમ્

માણિક્યાઞ્ચિતભૂષણાં મણિવરાં માહેન્દ્રનીલોજ્જ્વલાં
    મન્દારદ્રુમમાલ્યભૂષિતકચાં મત્તેભકુમ્ભસ્તનીમ્ ।
મૌલિસ્તોમનુતાં મરાળગમનાં માધ્વીરસાનન્દિનીં
    ધ્યાયે ચેતસિ કાળહસ્તિનિલયાં જ્ઞાનપ્રસૂનામ્બિકામ્ ॥ ૧॥

શ્યામાં રાજનિભાનનાં રતિહિતાં રાજીવપત્રેક્ષણાં
    રાજત્કાઞ્ચનરત્નભૂષણયુતાં રાજ્યપ્રદાનેશ્વરીમ્ ।
રક્ષોગર્વનિવારણાં ત્રિજગતાં રક્ષૈકચિન્તામણિં
    ધ્યાયે ચેતસિ કાળહસ્તિનિલયાં જ્ઞાનપ્રસૂનામ્બિકામ્ ॥ ૨॥

કલ્યાણીં કરિકુમ્ભભાસુરકુચાં કામેશ્વરીં કામિનીં
    કલ્યાણાચલવાસિનીં કલરવાં કન્દર્પવિદ્યાકલામ્ ।
કઞ્જાક્ષીં કલબિન્દુકલ્પલતિકાં કામારિચિત્તપ્રિયાં
    ધ્યાયે ચેતસિ કાળહસ્તિનિલયાં જ્ઞાનપ્રસૂનામ્બિકામ્ ॥ ૩॥

ભાવાતીતમનઃપ્રભાવભરિતાં બ્રહ્માણ્ડભાણ્ડોદરીં
    બાલાં બાલકુરઙ્ગનેત્રયુગલાં ભાનુપ્રભાભાસિતામ્ ।
ભાસ્વત્ક્ષેત્રરુચાભિરામનિલયાં ભવ્યાં ભવાનીં શિવાં
    ધ્યાયે ચેતસિ કાળહસ્તિનિલયાં જ્ઞાનપ્રસૂનામ્બિકામ્ ॥ ૪॥

વીણાગાનવિનોદિનીં વિજયિનીં વેતણ્ડકુમ્ભસ્તનીં
    વિદ્વદ્વન્દિતપાદપદ્મયુગલાં વિદ્યાપ્રદાં શઙ્કરીમ્ ।
વિદ્વેષિણ્યભિરઞ્જિનીં સ્તુતિભવાં વેદાન્તવેદ્યાં શિવાં
    ધ્યાયે ચેતસિ કાળહસ્તિનિલયાં જ્ઞાનપ્રસૂનામ્બિકામ્ ॥ ૫॥

નાનાભૂષિતભૂષણાદિવિમલાં લાવણ્યપાથોનિધિં
    કાઞ્ચીચઞ્ચલઘાટિકાકલરવાં કઞ્જાતપત્રેક્ષણામ્ ।
કર્પૂરાગરુકુઙ્કુમાઙ્કિતકુચાં કૈલાસનાથપ્રિયાં
    ધ્યાયે ચેતસિ કાળહસ્તિનિલયાં જ્ઞાનપ્રસૂનામ્બિકામ્ ॥ ૬॥

મઞ્જીરાઞ્ચિતપાદપદ્મયુગલાં માણિક્યભૂષાન્વિતાં
    મન્દારદ્રુમમઞ્જરીમધુઝરીમાધુર્યખેલદ્ગિરામ્ ।
માતઙ્ગીં મદિરાલસાં કરશુકાં નીલાલકાલઙ્કૃતાં
    ધ્યાયે ચેતસિ કાળહસ્તિનિલયાં જ્ઞાનપ્રસૂનામ્બિકામ્ ॥ ૭॥

કર્ણાલમ્બિતહેમકુણ્ડલયુગાં કાદમ્બવેણીમુમાં
    અમ્ભોજાસનવાસવાદિવિનુતામર્ધેન્દુભૂષોજ્જ્વલામ્ ।
કસ્તૂરીતિલકાભિરામનિટિલાં ગાનપ્રિયાં શ્યામલાં
    ધ્યાયે ચેતસિ કાળહસ્તિનિલયાં જ્ઞાનપ્રસૂનામ્બિકામ્ ॥ ૮॥

કૌમારીં નવપલ્લવાઙ્ઘ્રિયુગલાં કર્પૂરભાસોજ્જ્વલાં
    ગઙ્ગાઽઽવર્તસમાનનાભિકુહરાં ગાઙ્ગેયભૂષાન્વિતામ્ ।
ચન્દ્રાર્કાનલકોટિકોટિસદૃશાં ચન્દ્રાર્કબિમ્બાનનાં
    ધ્યાયે ચેતસિ કાળહસ્તિનિલયાં જ્ઞાનપ્રસૂનામ્બિકામ્ ॥ ૯॥

બાલાદિત્યનિભાનનાં ત્રિનયનાં બાલેન્દુના ભૂષિતાં
    નીલાકારસુકેશિનીં વિલસિતાં નિત્યાન્નદાનપ્રદામ્ ।
શઙ્ખં ચક્રવરાભયં ચ દધતીં સારસ્વતાર્થપ્રદાં
    તામ્બૂલીં ત્રિપુરાં શિવસેનસહિતાં ધ્યાયામિ મૂકામ્બિકામ્  ॥ ૧૦॥

ઇતિ જ્ઞાનપ્રસૂનામ્બિકાસ્તોત્રં સમાપ્તમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

*j nAnaprasUnAmbAstotram*

pdf was typeset on March 14, 2020

Please send corrections to *sanskrit@cheerful.com*